सुरकेतकी—मेलरागः (षण्मुखप्रियामेलजन्यः)
(आ) स रि ग म प ध नि स.
(अव) स ध म ग रि स.
मल

सुरटारागध्यानम्
तुम्बुरुवीणाहस्तां शम्बररिपुसन्निभे समासीनाम्।
सुरटां स्वरगुणसुरटां कवचोष्णीषकधारिणीं स्मरामि॥
रागसागरः

सुरटी—मेलरागः (काम्भोजीमेलजोऽग्ररागः)
सुरटीराग आरोहे त्यागधैवतवर्जनम्।
त्यागो गान्धारः।
परमेश्वरः

—मेलरागः (हरिकाम्भोजीमेलजन्यः)
(आ) स रि म प नि स.
(अव) स नि ध प म ग प म रि स.
मल

सुरतलीलः—प्रबन्धः
पदेपदे भवेद्रागस्तालस्त्वान्यः पदे पदे।
यदान्ते स्वरपाटाभ्यां गेयस्सुरतलीलकः॥
सोमेश्वरः

सुरतारम्भचन्द्रहासः—सूडप्रबन्धः
जयमङ्गलतालेन पद्यैः शृङ्गारनिर्भरम्।
गीत्वा पाटाःस्वरास्तेनारच्यन्ते यत्र रूपके॥
देवशाखाभिधे रागे सुरतारम्भनामतः।
चन्द्रहासप्रबन्धोऽयं प्रीतिकृत्कमलापतेः॥
कुम्भः

सुरदयिता—ध्रुवावृत्तम्
आद्यचतुर्थे परनिधने यत्र गुरूणि प्रति चरणम्।
गीतविधाने भवति हि सा पङ्क्तिकृता वै सुरदयिता।
हंसजुवानो परिभविद्रो—हंसयुवा परिभ्रमति॥
भरतः

सुरभिः—देशीतालः
सुरभिः कथ्यते धनाः। चतुर्भिर्लघुभिर्मिश्रैः।
ऽऽऽऽ।।।।
लक्ष्मणः

सुरभिप्रिया—मेलरागः (हरिकाम्भोजीमेलजन्यः)
(आ) स रि ग प नि स.
(अव) स नि ध प म ग रि स.
मल

सुरभिमुखी—ध्रुवावृत्तम्
आद्ये चतुर्थदशमाष्टमस्तथान्त्ये च यत्र गुरुचरणे।
एकादशाक्षरगते च सा प्रकृत्याश्रयाद्धि सुरभिमुखी॥
पच्चूसकालसुहसीदलेण फुल्लारविंदसुरभिमुही।
प्रत्यूषकालसुखशीतलेन फुल्लारविंदसुरभिमुखी॥
भरतः

ध्रुवायथाक्षरस्थाने तालदेशस्तु पूर्ववत्।
हिन्दोले सुरभिमुखी नायकानां प्रवेशजे॥
नान्यः

सुरवराली—मेलरागः (शुभपन्तुवरालीमेलजन्यः)
(आ) स रि म प ध स.
(अव) स नि ध प म ग रि स.
मल

सुरवसैन्धवं—मेलरागः (खरहरप्रियामेलजन्यः)
(आ) स रि म ग म प नि ध नि स.
(अव) स नि ध प म ग रि स.
मल

सुरालयः—मेलरागः
गौरीमेलसमुद्भूतो धैवतस्वरवर्जितः।
आरोहणे रिहीनः स्यान्निषादादिः सुरालयः॥
सायंगेयः।
अहोबिलः

सुरुली—सुषिरवाद्यम्
हस्तद्वयाधिका दीर्घा तारस्त्रचतुष्टया।
मुखरन्ध्रेण संयुक्ता सुरुली श्रुतिशोभना॥
अस्या मुरलीति नामान्तरम्।
सोमेश्वरः

सुरेश्वरः—मेलरागः (ऋषभप्रियामेलजन्यः)
(आ) स रि ग प ध नि स.
(अव) स नि ध प म प ग रि स.
मल

सुललिता—श्रुतिः
तारगान्धारस्य प्रथमा श्रुतिः।
पार्श्वदेवः

—ध्रुवावृत्तम्
आद्यचतुर्थे च त्वन्त्यमुपान्त्यं च यत्र गुरूणि स्युः।
सुललिता ज्ञेया— पेछसि सब्भावं। प्रेक्षसि सद्भावम्।
भरतः

सुवक्त्रा—मूर्छना
अस्याः सुमुखीति नाम नारदशिक्षायां दृश्यते।
गान्धारमूर्छनादेव सुवक्त्रा मूर्छना भवेत्।
सर्वपापहरा सा तु प्रगीता हरसन्निधौ॥
(नन्द्यावर्तग्रामे तृतीया मूर्छना)
आदिभरतगजाङ्कुशः
इयं नागवल्लभा (पण्डितमण्डली)

